दिनाङ्क :- 16.06.2025

प्रातः :- 06:55

## प्रधानमन्त्री -

प्रधानमन्त्रिणा नरेन्द्रमोदिना भारतस्य प्रगतिविषये अवधानं प्रदत्तम्। श्री मोदिना स्वाधिकारिकयात्रावधौ लिमासोल्-नगरे व्यापारसम्बद्ध सम्मेलने प्रोदीरितं यत् साइप्रस् भूमध्य-सागरीय क्षेत्रस्य यूरोपीयसङ्घस्य च मित्रम्, महत्वपूर्ण: सहयोगी च अस्ति। सममेव एषा यात्रा ऐतिहासिकसम्बन्धं सुदृढं कर्तुं व्यापार-निवेश-सुरक्षा-प्रौद्योगिक्या: क्षेत्रेषु भारतस्य विस्तारं कर्तुं च वर्तते, जनेषु आदानम्-प्रदानं च प्रवर्तयितुं अवसरं प्रददाति।

श्री मोदिना एतदपि उक्तं यत् सम्प्रति भारतं न केवलं व्यापारे सहजताया: विषये ध्यानं यच्छति अपितु "व्यापारे विश्वास:" इति विषयेऽपि ध्यानकेन्द्रितं करोति। तेन साइप्रस स्टॉक एक्सचेन्ज इति विषयेऽपि स्वाभिप्रायं प्रकटितम्।

## पीएम गिफ्ट सिटि-

अद्य तावत् प्रधानमन्त्री नरेन्द्र मोदी साइप्रस देशस्य राष्ट्रपतिना निकोस क्रिस्टोडौलिडेस इत्यमुना सह वार्तां विधास्यति। प्रधानमन्त्री कनाडादेशे जी-7 शिखरसम्मेलने भागं गृहिष्यति। तदनन्तरं प्रधानमन्त्री क्रोएशिया यास्यति तत्रैव तत्रत्य राष्ट्रपतिना ज़ोरान मिलनोविक अपि च क्रोएशिया देशस्य प्रधानमन्त्रिणा आंद्रे प्लेंकोविच इत्यनेन सह अपि मेलिष्यति।

## अमित शाह:

केन्द्रीय गृहमन्त्री अमित शाह: जनगणनाया: विषये समीक्षां अकरोत्। ह्य: नव-दिल्ल्यां केन्द्रीय गृह सचिवं समेत्य अन्ये च वरिष्ठाधिकारिण: उपवेशने समुपस्थिता: आसन्। श्री शाहेन एकस्मिन् सोशल मीडिया पोस्ट इति माध्यमेन उक्तं यत् जनगणनाया: अधिसूचना अद्यैव आयास्यति सममेव प्रथमं वारं जातिगत जनगणनाऽपि भविष्यति।

## विमान-दुर्घटना-डीएनए मेलानम्

अहमदाबाद-विमान-दुर्घटनायां एकत्रिंशत् पीड़ितानां डी.एन.ए. प्रतिरूपाणां मेलनम् जातम्। इदानीं यावत् पंचत्रिंशत् शवा: मृतकानां परिजनेभ्य: समर्पिता:। अहमदाबादे-सिविल-अस्पताल चिकित्सालयस्य अतिरिक्त अधीक्षकेण डॉक्टर रजनीश पटेलेन प्रोक्तम् यत् येषां जनानां डी.एन.ए. प्रतिरूपाणां मेलनं जातम्, तेषां शवा: तेषाम् परिजनेभ्य: समर्प्यन्ते।

पूर्वमुख्यमन्त्रिणः स्वर्गीय विजय रूपाणी इत्यस्य डी.एन.ए. मेलनं जातम्। राज्य-गृह-मन्त्रिणा हर्ष सिंहवी-इत्यनेन घोषणा कृता।

ईरान्-इजरायल युद्धम्

ईरान् इजरायल् देशौ च स्वस्य प्रत्यक्षसङ्घर्षस्य घातकतमं चरणं प्रविष्टवन्तौ। तेहराननगरे इजरायल् देशेन प्रमुख-तैल-ऊर्जा स्थलेषु आक्रमणस्य मध्ये इजरायल्-नगरेषु ईरानी-प्रहारैः अधिकाः जनाः मृताः। सैन्य-विनिमयस्य चतुर्थदिनं यावत् एतत् वर्धनं भवति, यत्र मानवीया क्षतिः वर्धमानायाः क्षेत्रीय अस्थिरतायाः च वर्धमानयोः देशयोः अग्रे क्रियान्वयनाय कर्तुं प्रतिज्ञा कृताऽस्ति।

ऋतुः

भारतीय-ऋतु-विज्ञान विभागेन देशस्यास्य पश्चिमतटे अति वृष्टिः कारणात् रेड अलर्ट इत्यस्य संचेतना प्रसारिता। केषुचित् जनपदेषु ऑरेंज अलर्ट इत्यस्य संचेतना च प्रसारिता। पञ्जाब-हरियाणा-दिल्ली-एनसीआर-गुजरात- क्षेत्राणां केषुचित् भागेषु वज्रपातेन सह वृष्टेः संभावना विद्यते।

तीरंदाजी

लक्ष्य वेध प्रतिस्पर्धायां, चयन प्रक्रिया गतसायं समजायत। एतद् चयनं वर्ल्ड कप इत्यस्य चतुर्थ चरणस्य कृते वर्तते। चत्वारः चिताः क्रीडकाः स्पेन देशस्य मेड्रिडनगरे जुलाई मासस्य अष्ट दिनाङ्कात् आरभ्य त्रयोदश दिनाङ्कं यावत् वर्ल्ड कप चतुर्थ चरणे भागं गृहिष्यन्ति।